# आचार्यप्रशस्तिः

नमाम्यभोगिपरिवारसंपदं निरस्तभूतिमनुमार्धविग्रहम् ।
अनुग्रमुन्मृदितकाललाञ्छनं विनाविनायकमपूर्वशङ्करम् ॥ १ ॥

(श्रीपद्मपादाचार्याणाम्)

यद्वक्त्रमानससरः प्रतिलब्धजन्म-
भाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गा
तान् भाष्यवित्तकगुरून् प्रणतोऽस्मिमूर्ध्ना ॥

आशैलादुदयात् तथाऽस्तगिरितो भास्वद्यशोरश्मिभिः
व्याप्तं विश्वमनन्धकारमभवद्यस्य स्म शिष्यैरिदम् ।

Scanned with CamScanner

आरात् ज्ञानगभस्तिभिः प्रतिहश्चन्द्रायते भास्करः
तस्मै शङ्करभानवे तनुमनोवाग्भिर्नमः स्यात् सदा ॥ २ ॥
(श्री सुरेश्वराचार्याणाम्)

येषां धीसूर्यदीप्त्या प्रतिहतिमगमन्नाशमेकान्ततो मे
ध्वान्तं स्वान्तस्य हेतुर्जननमरणसन्तानदोलाधिरूढेः ।
येषां पादौ प्रपन्नाः श्रुतिशमविनयैः भूषिताः शिष्यसंघाः
सद्यो मुक्ताः स्थितास्तान् यतिवरमहितान् यावदायुर्नमामि ॥
(श्रीत्रोटकाचार्याणाम्)

उद्धृत्य वेदपयसः कमलामिवाब्धेः
आलिङ्गिताखिलजगत्प्रभवैकमूर्तिम् ।
विद्यामशेषजगतां सुखदामदाद्यः
तं शङ्करं विमलभाष्यकृतं नमामि ॥ ४ ॥
(विवरणाचार्याणाम्)

यद्भाष्याम्बुजजातजातमधुरप्रेयोमधुप्रार्थना-
सार्थव्यग्रधियःसमग्रमरुतः स्वर्गेऽपि निर्वेदिनः ।
यस्मिन्मुक्तिपथः पथीनमुनिभिः संप्रार्थितः संबभौ
तस्मै भाष्यकृते नमोऽस्तु भगवत्पादाभिधां बिभ्रते ॥५॥
(श्रीमदानन्दगिर्याचार्याणां सूत्रभाष्यव्याख्यायां=६)

Scanned with CamScanner

चक्कारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्वितासीत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥६॥
(सर्वज्ञात्ममुनीनाम्)

वेदान्त तदाभासक्षीरनीर विवेकिनम् ।
नमामिभागवत्पादं परहंसदुरन्धरम् ॥
(अमलानन्द कल्पतरु)

भगवत्पादपादाब्जपांसवः सन्तु सन्ततम् ।
अपारासारसंसारसागरोत्तारसेतवः ॥ ७ ॥
(चित्सुखाचार्याणाम् )

वेदान्ताम्भोगभीरा नयमकरकुला ब्रह्मविद्याब्जपण्डा
पापण्डोत्तुङ्गवृक्षप्रमथननिपुणा मानवीचीतरङ्गा ।
यस्यास्योत्था सरस्वत्यखिलभवभयध्वंसिनी शंकरस्य
गङ्गा शंभोः कपर्दादिव निखिलगुरोर्नौमि तत्पादपद्मम्॥८॥
(ज्ञानघनपादानां - तत्वशु १)

मीमांसया कपटतो भुजगाम्बयेव स्वाधीनतामुपनिषद्विनतेव नीता ।
येनोद्धृताऽमृतफलेन गरुत्मतेव तस्मै नमो भगवतेऽद्भुत-
शङ्कराय ॥ ९ ॥
(श्रीमधुसूदनसरस्वतीनां वेदान्तकल्पलतिकायाम् )

Scanned with CamScanner

नमस्तस्मै भगवते शंकराचार्यरूपिणे ।
येन वेदान्तविद्येयमुद्धृता वेदसागरात् ॥ १० ॥
(श्री विद्यारण्यमुनिविरचितायां अपरोक्षानुभूतिदीपिकायाम्)

मिथ्याज्ञानविजृम्भमाणजगतामभ्यन्तरे भुञ्जतः
स्वारब्धानि निरीक्ष्य जीवनिचयान्मूढानविद्यावशान् ।
देवः कारुणिकोऽवतीर्य समशासद्यस्तु शारीरके
भाष्यं तं प्रणमामि शङ्करगुरुं निःश्रेयसावाप्तये ॥ ११ ॥
(श्रीरघुनाथसूरिरचिते शांकरपादभूषणे)

जनैश्चतुर्भिः कलितोऽपि पञ्चमो दिदेश कोटिं कृतिभिर्न पञ्चमीम् ।
स्वमद्वयां सौगतबोधचुम्बिनीं स शङ्कराचार्यवरः पुनातु नः॥१२॥
(श्रीशङ्करचैतन्यभारतीस्वामिरचितायां
शारदाख्यखण्डनखण्डखाद्यव्याख्यायाम्)

स्तुवन्मोहतमस्तोमभानुभावमुपेयुषः ।
स्तुमस्तान्भगवत्पादान् भवरोगभिषग्वरान् ॥ १३ ॥
(श्रीसदाशिवेन्द्रसारस्वतीरचितायां ब्रह्मसूत्रवृत्तौ)

नमामि शङ्कराचार्यगुरुपादसरोरुहम् ।
यस्य प्रसादान्मूढोऽपि सर्वज्ञोऽहं सदाऽस्म्यहम् ॥ १४ ॥
(आनन्दगिरिशङ्करविजये)

Scanned with CamScanner

यो लोकोपकृतिप्रविष्टहृदयो जित्वातिबाह्यं मतं
श्रीमच्छङ्करशब्दपूर्वभगवत्पादाभिधानं गतम् ।
सद्वेदान्तरहस्यवत्स्फुटितवान् गोप्यं रहो मानवं
तं वन्दे भगवन्तमन्तकरिपुं सर्वान्तरायच्छिदम् ॥ १५ ॥

(श्रीकामेश्वरसूरिकृतायां अरुणामोदिनीनाम्न्यां
सौन्दर्यलहरीव्याख्यायाम् )

तं वन्दे शङ्कराचार्यं लोकत्रितयशङ्करम् ।
सत्तर्कनखरोद्दीर्णवावदूकमतङ्गजम् ॥ १६ ॥

(श्रीतत्त्वबोधभगवत्प्रणीते तत्त्वबोधे)

महामोहपङ्के विरिञ्चाचरान्तं प्रजाहस्तिनं मग्नमालोक्य भाष्यैः ।
जलैः क्षालयित्वाऽऽत्मविद्यादिवं यो नयत्येकलं शङ्करं तं
नमामि ॥ १७ ॥

(श्रीज्ञानामृतयतेः कृतौ विद्यासुरभिसंज्ञके नैष्कर्म्यसिद्धिविवरणे)

आनन्दघनमद्वन्द्वं निर्विकारं निरञ्जनम् ।
भजेऽहं भगवत्पादं भजतामभयप्रदम् ॥ १८ ॥

(मनीषापञ्चकव्याख्याने)

स्वप्रग्रहवेदवाजिनि महन्मीमांसकस्यन्दने
तिष्ठन् भाष्यपिनाकमुज्ज्वलगुणं कृत्वात्मधीसायकम् ।

Scanned with CamScanner

आकृष्य प्रददच्छेषविपदां मूलं पुराणां त्रयं
भूयात्सोऽभिनवः पुरारिशुभस्योच्छित्तये शङ्करः ॥ १९ ॥
(रामानन्दस्य ऋजुविवरणव्याख्यायाम्)

यद्भाष्यसागरजयुक्तिमणीन् प्रकीर्णान्
प्राप्याधुना कतिपयान् कवयो भवन्ति ।
तस्मै नमो जनमनोऽब्जदिवाकराय
कृत्स्नागमार्थनिलयाय यतीश्वराय ॥ २० ॥
(श्री बोधनिधिकृते उपदेशप्रकरणविवरणे)

याऽनुभूतिः स्वयं ज्योतिरादिरयेशानविग्रहा ।
शंकराख्या च तं नौमि सुरेश्वरपदास्पदम् ॥ २१ ॥
(श्री नृसिंहप्रज्ञमुनिकृते बृहदारण्यकभाष्यवार्तिकन्यायतत्त्व-
विवरणे)

मेधायाथात्म्यसिद्धयै भवतु भगवती दग्धजीवच्छरीर-
म्लेच्छालापाहिमूर्च्छानिमिषदुपनिषज्जीवजीवातुरुक्तिः ।
अद्वैतब्रह्मराद्धान्तिकसकलपुराणेतिहासोपक्लृप्ता-
मासा साम्राज्यपीठीमनघजनमनश्शङ्करी शाङ्करी नः ॥ २२ ॥
(श्री वेङ्कटनाथस्य)

विचार्य सर्ववेदान्तैः संचार्य हृदयाम्बुजे ।
प्रचार्य सर्वलोकेषु आचार्यं शङ्करं भजे ॥ २३ ॥
(नारायणीयोपनिषद्भाष्ये)



Scanned with CamScanner

संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकाङ्क्षया मरुभुवि श्रान्त्या परिभ्राम्यताम्।
अत्यासन्नसुधांबुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्त्येषा शङ्करभारती विजयते निर्वाणसंदायिनी ॥ २४ ॥
(विवेकचूडामणौ)

हरलीलावताराय शङ्कराय वरौजसे।
कैवल्यकलनाकल्पतरवे गुरवे नमः ॥ २५ ॥
(श्री उमामहेश्वररचितायां तत्त्वचन्द्रिकायाम्)

यमाश्रिता गिरां देवी नन्दयत्यात्मसंश्रितान्।
तमाश्रये श्रिया जुष्टं शङ्करं करुणानिधिम् ॥ २६ ॥
(श्री बोधेन्द्रयतीनामद्वैतभूषणे)

वेदान्तोदरवर्ति भास्वदमलं ध्वान्तच्छिदस्मद्धियो
यद्दिव्यं ज्ञानमतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित्।
यो नो न्यायशलाकयैव निखिलं संसारबीजं तमः
प्रोत्सार्याविरकार्षीद्‌गुरुगुरुः पूज्याय तस्मै नमः ॥ २७ ॥
(श्रीमत्सुरेश्वराचार्यरचितायां नैष्कर्म्यसिद्धौ)

यमाश्रिता गिरां देवी नन्दयत्यात्मसंश्रितान्।
तमाश्रये श्रिया जुष्टं शङ्करं करुणानिधिम् ॥ २८ ॥
(श्री बोधेन्द्रसंयमिप्रणीते अद्वैतभूषणे [विवरणप्रमेयसंग्रहे])

Scanned with CamScanner

वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
यतिरूपधरं वन्दे शङ्करं लोकशङ्करम् ॥ २९ ॥

(हरिहराद्वैतभूषणे)

अखिलपरमहंसदेशिकमागमगूढार्थदर्शकं प्राज्ञम् ।
स्वानन्दपूर्णसागरमनिशमहं नौमि शङ्कराचार्यम् ॥ ३० ॥

(श्रीनागनाथरचिते आत्मबोधप्रकरणे)

दृष्ट्वा यो दिव्यदृष्टिः कलियुगसमये मन्दभाग्या मनुष्या-
स्तस्मात्तन्त्रप्रपञ्चः सुरयजनविधिर्मत्कृतो निष्फलः स्यात् ।
इत्याविर्भूय पृथ्व्यां पुनरपि कृतवांस्तन्त्रसारं गिरीश-
स्तं वन्दे शङ्कराख्यं महिततममनः प्रार्थनीयार्थरूपम् ॥ ३१ ॥

(प्रपञ्चसारसंबन्धदीपिकायाम्)

यदीयवाक्सूर्यरुचिप्रणाशितो हृदन्धकारो नमतामशेषतः ।
महात्मनश्शिष्यहिते सदारतान् नमामि तान् शङ्करपूज्य-
देशिकान् ॥ ३२ ॥

(श्रीशङ्करकविरचिते कैवल्यनवनीते)

वेदान्तार्थं गभीरं ह्यतिसुगमतया बोधयामीति विष्णु-
र्व्यासात्माऽस्तत्रपञ्चद्दुरधिगममभूद्वादिदुर्बुद्धिभेदात् ।

Scanned with CamScanner

भिन्दन् दुर्बुद्धिभेदं य इह करुणयाऽभाष्यद्भाष्यमेतत्
तं वन्दे सर्ववन्द्यं त्रिजगति भगवत्पादसंज्ञं महेशम् ॥ ३३ ॥
(रामानन्दसारस्वतीकृतविवरणोपन्यासे)

नमः श्रीशङ्कराचार्यगुरवे शङ्करात्मने ।
शरीरिणां शङ्कराय शङ्करज्ञानहेतवे ॥ ३४ ॥
(श्रीमन्नृसिंहाश्रमविरचितायां तत्त्वबोधिन्याख्यायां
संक्षेपशारीरकटीकायाम् )

येनाद्वन्द्वमखण्डमक्षयपदं प्रादर्शि तापापहं
भाष्यग्रन्थनिबन्धनैः श्रुतिशिरोवाक्यार्थविद्योतिभिः ।
नित्यो यत्र समस्तसद्गुणगणस्तं शङ्कराचार्यगी-
र्विख्यातं मुनिमौलिलालितपदद्वन्द्वं सदा संश्रये ॥३५॥
(श्रीरामतीर्थस्वामिरचितायां अन्वयार्थप्रकाशिकाख्यायां
संक्षेपशारीरकव्याख्यायाम् )

त्रिवर्गेणाक्रान्ते जननमरणादिव्रणभुवा
जनेऽस्मिन् सर्वस्मिंस्तिमिरपरिणाहैकशरणे ।
निषेद्धुं निध्यातोऽमृतभगपतिः शङ्कर इति
स्वनाम व्याख्यातुं जयति कुहनाभिक्षुरनिशम् ॥३६॥
(अभिनवद्राविडाचार्य श्रीबालकृष्णानन्दसरस्वतीनां
शारीरकमीमांसाभाष्यवार्तिके)

यद्भाष्योक्तेर्लवपरिजुषश्छात्रवर्गा महान्तो
निर्भिन्दन्ति प्रबलमतयो वादिशैलं समस्तम् ।
यैर्वेदाब्धेरमृतमिव सद्भाष्यमामत्प्रकाशं
तत्पादाब्जं स्फुरतु हृदये ह्युद्धृतं सर्वदा मे ॥ ३७ ॥
(मनीषापञ्चरत्नलघुविवरणे)

संसारसर्पपरिदष्टविनष्टजन्तु-
सञ्जीवनाय परया कृपयोपपन्नः ।
ब्रह्मावबोधपरमौषधमुद्वहन् य-
स्तं शंकरं परतरं भिषजां भजामि ॥ ३८ ॥
(अद्वैतबोधामृतम्)

श्रीसंबन्धमुदीक्ष्य वाचकपदे यान् शार्ङ्गिणं वैष्णवाः
चन्द्रोत्तंसपदास्पदत्वकलनाच्छम्भुं च शैवा विदुः ।
आनन्दाढ्यशोभमानपरमप्रेमास्पदं योगिन-
स्तान् पादाम्बुजरेणुधूततमसो वन्दे सदा श्रीगुरून् ॥ ३९ ॥
(श्रीगङ्गाधरसरस्वत्याख्यभिक्षुणा रचितायां
आत्मसाम्राज्यसिद्धिव्याख्यायाम्)

अधिगतमिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभागान् संप्राप्य शौरिपदोद्गता ।

जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ ४० ॥
(श्रीमदप्पय्यदीक्षितानां सिद्धान्तलेशसंग्रहे-१)

विष्णवे व्यासरूपाय ब्रह्मसूत्रकृते नमः ।
महेशाय च तद्भाष्यकृते शंकररूपिणे ॥ ४१ ॥
(श्रीमदल्लालसूरिरचिते भामतीतिलके)

यत्पादाब्जप्रभवविमलश्रीपरागालिभास्वान्
मत्स्वान्तस्थं प्रणुदति तमः पुञ्जमत्यन्तचण्डम् ।
यत्कारुण्यप्लवपरिजुषा तारितोऽनेन तूर्णं
संसाराब्धिः प्रणतिरनिशं स्याद्गुरूणां पदाब्जे ॥ ४२ ॥
(सीतारामसूरिरचिते वेदान्तकौस्तुभे)

वेदान्तव्रातनीरं शतपथकथितन्यायरत्नप्रपूरं
पारावारं सुतारं निगममुखपडङ्गात्मसद्ग्राहघोरम् ।
कारंकारं सुगाहं श्रुतमतमथितैर्ब्रह्मविद्यामृतं यः
प्रादादादाय तस्मादशरणशरणं शङ्करं तं नमामः ॥ ४३ ॥
(श्रीमदानन्दपूर्णरचितायां न्यायकल्पलतिकानाम्न्यां
सुरेश्वरवार्तिकटीकायाम्)

Scanned with CamScanner

वेदान्तार्थविभासकाय गुरवे शान्ताय सन्न्यासिने
नानावादिनगेन्द्रसङ्घपवये योगीन्द्रवन्द्याय च ।
मोहध्वान्तदिवाकराय भगवत्पादाभिधां बिभ्रते
तस्मै भाष्यकृते नमोऽस्तु सततं पूर्णाय बोधात्मने ॥४४॥

(तैत्तिरीयभाष्यटीकायां)

काले शिवः क्रमवशात् कलिदोषदुष्टे
परसंप्रदायरहितं तदपेक्ष्य भूयः ।
क्षोण्यामवातरदशेषजगद्धितार्थी
श्रीशङ्कराख्यममलं गुरुमाश्रये तम् ॥ ४५ ॥

(श्री नारायणकृतौ प्रपञ्चसारार्थदीपे)

वेदाद्यागमदुग्धसिन्धुमथनात्तन्मेयमन्थाद्रिणा
दिव्याभोगविचारवासुकिवशादाश्रित्य धैर्यं परम् ।
ब्रह्मोद्बोधसुधां विधाय दयया मर्त्यानमर्त्यानमी
कुर्वन्तो गुरवो जयन्ति जगतां लक्ष्मीशवद्रक्षकाः ॥ ४६ ॥

(श्री वरदराजपण्डितकृतौ खण्डनमण्डने)

यद्वक्त्राम्बुजनिस्सृतं परमकं श्रीसूत्रभाष्यामृतं
पीत्वा मादृशजीवभृङ्गनिचया नन्दन्ति मोक्षाङ्गणे ।

Scanned with CamScanner

नानावादिमदेभभञ्जनमहाव्यग्रोग्रकण्ठीरवान्
वन्दे व्यासमुनीन्द्रशङ्करमुखान् सद्देशिकांस्तानहम् ॥४७॥
(श्रीमदमरेश्वरशास्त्रिरचिते अज्ञानध्वान्तचण्डभास्करे)

ये वेदान्तसुधोदधिं सुमनसां निश्श्रेयसाय स्वयं
निर्मथ्योदहरन्निरूपणगुणवृचेन चेतोमथा ।
अद्वैतामृतमासुगनुशयिनामास्वादनीयेतरत्
तानास्माकगुरोरुपैमि भगवत्पादादिमान् देशिकान्॥४८॥
(श्री कृष्णानन्दयतिकृतौ सिद्धान्तसिद्धाञ्जने)

संसाराब्धिनिपण्णाज्ञनिकरप्रोज्जिहीर्षया ।
कृतसंहननं वन्दे शङ्करं लोकशङ्करम् ॥ ४९ ॥
(श्रीविज्ञानवासयतिरचितायां पञ्चपादिकाव्याख्यायाम् )

श्रीगुरुं भगवत्पादं शरण्यं भक्तवत्सलम् ।
शिवं शिवकरं शुद्धमप्रमेयं नमाम्यहम् ॥ ५० ॥ (गुर्वष्टके)

योऽयं दैवतसार्वभौमविभवो विश्वाधिको रुद्र इत्याद्यै
श्राद्यवचोभिरद्वयपरैरद्यापि संस्तूयते ।
अद्वैतात्मविबोधनाय विदुषामिच्छासमङ्गीकृत-
श्रीमच्छङ्करदेशिकेन्द्रवपुषं श्रीशङ्करं भावये ॥ ५१ ॥
(श्रीशङ्कराचार्याष्टके)

यत्पादपङ्कजध्यानाल्लक्ष्मणाद्या यतीश्वराः ।
बभूवुस्तादृशं वन्दे शङ्करं षण्मतेश्वरम् ॥ ५२ ॥
(उत्तरगीताटीकायाम्)

क्वेमे शङ्करसद्गुरोर्गुणगणाः दिग्जालकूलङ्कषाः
कालोन्मीलितमालतीपरिमलावष्टम्भमुष्टिन्धयाः ।
क्वाहं हन्त तथापि सद्गुरुकृपापीयूषपारम्परी-
मग्नोन्मग्नकटाक्षवीक्षणबलादस्मि प्रशस्तोऽर्हताम् ॥ ५३ ॥
(संक्षेपशङ्करविजये)

श्रीमच्छङ्करसद्गुरोर्भगवतोऽगाधामसाधारणीं
वाणीं नः प्रतनीयसीं मुहुरिमां गाढं समुत्कण्ठते ।
तन्मूर्तिः प्रभुरेव भक्तजनतावात्सल्यवैपुल्यभू-
रस्मै साधु ददातु शस्तदयया हस्तावलम्बं हरः ॥५४॥
(श्रीवल्लीसहायकविकृतौ आचार्यदिग्विजये)

देशे कालटिनाम्नि केरलधराशोभाकरे सद्द्विजे
जातः श्रीपतिमन्दिरस्य सविधे सर्वज्ञतां प्राप्तवान् ।
भूत्वा षोडशवत्सरे यतिवरो गत्वा बदर्याश्रमं
कर्ता भाष्यनिबन्धनस्य सुकविः श्रीशङ्करः पावनः ॥५५॥
(श्रीगोविन्दानन्दरचिते शङ्कराचार्यचरिते)

Scanned with CamScanner

पाराशर्यवचोविलासमसृणैः सूत्रैः क्रमेणाततै-
स्त्यस्त्यैः प्रकटीचकार भगवान् यो भाष्यसंज्ञं पटम् ।
अज्ञानोद्भवजाड्यनाशकरणं स्वानन्ददं सेविनां
तं वन्देऽखिलयोगिवन्द्यचरणं श्रीशङ्करं शङ्करम् ।।५६।।
(श्रीकमलाकरदेवकृतौ आनन्दविलासे)

प्रचण्डपाखण्डविखण्डनोद्यतं त्रयीशिरोर्थप्रतिपादने रतम् ।
बुधैर्नुतं योगकलाभिरावृतं नमामि तं शङ्करदेशिकं ततम् ।। ५७ ।।
(श्रीसच्चिदानन्दसरस्वतीकृतौ आर्यान्याख्यायाम्)

विमथ्य वेदोदधितः समुद्धृतं) सुरैर्महाब्धेस्तुमहात्मभिर्यथा ।
तत्रामृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः ।।
(उपदेशसाहस्र्याम्)

सर्वतन्त्रस्वतन्त्राय सदात्माद्वैतरूपिणे ।
श्रीमते शङ्करार्याय वेदान्तगुरवे नमः ।। ५९ ।।
यद्वैदिका बोधयितुं सदस्तं शब्दाः प्रवृत्ता इति नेति नेति ।
तच्छङ्करानन्दसरस्वतीति ख्यातं परं दैवतमाश्रयामः ।। ६० ।।
(श्रीमुकुन्दकृतौ शङ्करमन्दारसौरभसमीरे)

श्रीगौरीनाथतत्त्वं सकलमुनिकृतं वेदवेदान्तवेद्यं
साक्षात्कैवल्यरूपं विधिहरिनमितं भोगमोक्षप्रदं च ।

Scanned with CamScanner

सत्यज्ञानादिरूपं प्रकटितमकरोत् ब्रह्मनिर्वाणमेकं
वन्देऽहं सेवकानामखिलसुखकरं शंकराचार्यमूर्तिम् ॥६१॥
(श्रीवामनकृतौ अपरोक्षानुभूतिसमश्लोक्याम्)

यत्कारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्विताऽऽसीत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शंकरमर्चिताङ्घ्रिम् ॥

नानाभाष्यादृता सा सगुणफलततिर्विध विद्याविशेषैः
तत्तद्देशाप्तिरम्या सरिदिव सकला यत्र यात्यंशभूयम् ।
तस्मिन्नानन्दसिन्धावतिमहति फले भावविश्रान्तिमुद्रा
शास्त्रस्योद्घाटिता यैः प्रणमत हृदि तान्नित्यमाचार्यपादान् ॥

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान् संप्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखांबुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥
(श्री अप्पय्यदीक्षिताः)

विविधग्रन्थेभ्यः समुद्धृतानि श्लोकरत्नानि ।

उद्धृत्य वेदपयसः कमलामिवाब्धेः
आलिङ्गिताखिलजगत्प्रभवैकमूर्तिम् ।
विद्यामशेषजगतां सुखदामदाद्यः
तं शङ्करं विमलभाष्यकृतं नमामि ॥

Scanned with CamScanner